International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(2): 33-38
© 2024 IJMH
www.themultijournal.com
Received: 22-06-2024
Accepted: 25-06-2024
Publish : 29-06-2024

**आचार्य चक्रवर्तिरङ्गनाथन्**
साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**निदेशकः –**
**आरादन्तर्जालीयविद्यानिकेतः**
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**आचार्य चक्रवर्तिरङ्गनाथन्**
साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीमद्रामायणे विभीषणशरणागतिः

**आचार्य चक्रवर्तिरङ्गनाथन्, आरादन्तर्जालीयविद्यानिकेतः**

**मङ्गलश्लोकः – अथ सरसिजयोनेराज्ञया रामवृत्तं**
**करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।**
**शुभमतनुत काव्यं स्वादु रामायणाख्यं**
**मधुमयभणितीनां मार्गदर्शी महर्षिः॥**[1]

आदिकाव्यत्वेन प्रसिद्धमेतद् रामायणं भारतीयानामस्माकं नित्यानुसन्धेयो ग्रन्थो भवति। प्रत्यहमपि बहवः महत्या श्रद्धया श्रीमद्रामायणस्य पारायणं कुर्वन्तः, फलवन्तो भवन्तीति विश्वजनीनोऽयं विषयविशेषः। रामायणस्य यावान् आदरः प्रचारः विद्यते, तावान् न कस्यापि विद्यते इति नात्युक्तिः। रामायणपारायणविधेः यावत् महत्वं तावत् महत्त्वं नान्यस्य ग्रन्थस्यास्तीति विद्म एव। गायत्रीमहामन्त्रस्य यावान् महिमा विद्योतते तावानेव रामायणस्यास्तीति विषये अनुभवज्ञाः प्रमाणम्। अत एवोच्यते – [2]**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।**
**तावत् रामायणकथा लोकेषु प्रचरिष्यति॥** इति प्रथा।

**रामायणम् –**

इदमेकम् आदिकाव्यम्। अयं कश्चन इतिहासः, इदमेकमाख्यानम्, इयमेका कथा, एषैका संहिता, इति अस्य ग्रन्थस्य व्यवहाराः दृश्यन्ते।

**काव्यम् –** [3]**उपश्लोक्यस्य माहात्म्यात् उज्ज्वलाः काव्यसंपदः।**
**प्रबन्धानां प्रबन्धॄणामपि कीर्तिप्रतिष्ठयोः**
**मूलं विषयभूतस्य नेतुर्गुणनिरूपणम्॥**

रामवैभवपरकत्वात् वाल्मीकिप्रणीतत्वात् रामायणमेतत् सर्वथा प्रथत एव –

[4]**उदारवृत्तार्थपदैर्मनोरमैस्ततः स रामस्य चकार कीर्तिमान्।**
**समाक्षरैः श्लोकशतैर्यशस्विना यशस्करं कव्यमुदारधीर्मुनिः॥**

पूर्वं कविशब्देन परमात्मा एव व्यवहृतः। “कविर्मनीषी परिभूः स्वयंभूः” इति। रामायणकाव्यग्रथनेन वाल्मीकिः आदिकविरभूदिति दण्डी वदति। “जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्” इति।

**आख्यानम् – रामायणम् –**

भगवान् वील्मीकिः आख्यानशब्देन प्रबन्धमेतं व्यवहरति। यथा
**तौ राजपुत्रौ कात्स्र्न्येन धर्म्यमाख्यानमुत्तमम्।**
**वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ।।**[5]

**कथा-रामायणम्**

**कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम्।**
**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।।**
**तावत् रामायणकथा लोकेषु प्रचरिष्यति।**
**यावत् रामायणकथा त्वत्कृता प्रचरिष्यति।।**[6]

**संहिता- रामायणम् –**

वेदस्य संहिता व्यपदेशः। वस्तुतः मन्त्रभागस्य संहितेति व्यवहारः अस्ति। रामायणस्यापि वेदतुल्यत्वात्संहितेति व्यपदेशः इति व्याख्याता गोविन्दराजः ब्रवीति।

**इतिहासः – रामायणम्**

उपर्ययं प्रबन्धः इतिहास इति च महर्षिणा व्यवहृतः।

[7]**पूजयंश्च पठंश्चेममितिहासं पुरातनम्॥**

इतिहासपदं तु अभिधानेषु - इतिह आस इति यथार्थगाथा-निरूपकपरः इत्युक्तम्।

**रामायणम् – धर्मः** (धर्मः-देशः-दैवम्-अथवा दैवम्-धर्मः-देशः)

“यतो धर्मः ततो जयः” इति प्रसिद्धा उक्तिः।“धारणात् धर्मः” “ध्रियते अनेन इति धर्मः” इति सन्ति व्युत्पत्तयः। “धर्मेण पापमपनुदति तस्मात् धर्मं परमं वदन्ति” इत्यादयः श्रुतयः अपि धर्मस्य वैभवं प्रतिपादयन्ति। तत्र “वेदोऽखिलो धर्ममूलम्” इति उक्तिरेव प्रमाणम्। भोजराजोऽपि चम्पूरामायणे-

[8]**उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्**
**तस्य प्रमाणवचनैः कृतकेतरैश्चेत्।**
**तेषां प्रकाशनदशा च महीसुरैश्चेत्**
**तानन्तरेण निपतेत् क्व नु मत्प्रणामः॥**

श्रीमद्रामायणे रामचन्द्रस्य धर्माभिवर्णनपराणि वाक्यपुष्पाणि विलसन्ति।

**कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।**
**धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः[9]॥**
**धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।**
**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्॥[10]**
**शुश्रूषन्ते च वश्शिष्याः कच्चित् कर्मसु दर्शिताः।**
**इति नः पुरुषव्याघ्रः सदा रामोऽभिभाषते॥[11]**
**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानां मघवानिव॥[12]**
**दिष्ट्या स कुशली रामो धर्मात्मा सत्यसंगरः।**
**लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः॥[13]**
**लक्ष्मणेन सह भ्राता सीतया चापि भार्यया।**
**रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः॥[14]**
**धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि।**
**पौरुषे चाप्रतिद्वन्द्वः शरैनं जहिरावणिम्॥[15]**

**रामायणे कृता धर्मप्रशंसा –**

**नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम।**
**प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम्।।[16]**
**तदेतत्तु मया कार्यं क्रियते भुवि नान्यथा।**
**पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते।।[17]**

रामायणे सर्वेषां धर्माणां प्रसक्तिः दृश्यते एव।

**1.पुत्रधर्मः**
**2.भ्रातृधर्मः**
**3.भर्तृधर्मः**
**4.मित्रधर्मः**
**5.वीरधर्मः**
**6.दारधर्मः**

**1.पुत्रधर्मः मातरि यथा-**

**मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण शारिका।**
**यस्यास्तच्छ्रूयते वाक्यं शुकपादमरेर्दश॥[18]**

**2.भ्रातृधर्मः –**

**देशे देशे कलत्राणि देशे देशे च बान्धवः।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥[19]**

**3.पतिधर्मः/दारधर्मः इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः**
**असावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।[20]**
**अयं कण्ठेबाहुः शिशिरमसृणो मौक्तिकसरः**
**किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥** भवभूतिना आविष्कृतम्

**4.मित्रधर्मः – गुहेन सह सख्यम्**

**पद्भ्यामभिगमाच्चैव स्नेहसंदर्शनेन च।**
**अर्चितश्चैव हृष्टाश्च वयम्.... इति वदति॥**
**प्रजानां विषये रामस्य धर्मनिरतिः यथा-**
**व्यसनेषु मनुष्याणां भृशं भवति दुःखितः।**
**उत्सवेषु च सर्वेषु पितेव परितुष्यति॥[21]**

**5.वीरधर्मः –**

**गगनं गगनाकारं सागरस्सागरोपमः।**
**रामरावणयोर्युद्धं रामरावणयोरिव॥**
**गच्छानुजानामि रणार्दितस्त्वम्**
**प्रविश्य रात्रिंचरराज लङ्काम्।**
**आश्वास्य निर्याहि रथी च धन्वी**
**तदा बलं द्रक्ष्यसि मे रथस्थः॥[22]**

एवं रामायणे बहवः धर्मविशेषाः भ्राजन्ते।

**शरणागतिः –**

भगवन्तं प्राप्तुम् उपायद्वयं विद्यत इति शास्त्रं ब्रवीति। तत्र सुलभसाध्या शरणागतिः। भक्तिस्तावत् कष्टसाध्या भवति । अतः आळवार्दिव्यसूरयः शरणागतिमेव प्रधानतया स्वीकृतवन्तः। यथा - नाम्माळवार्-श्रीशठगोपः-अगलगिल्लोन्- तिरुवाय्मोळि (6-10-10)

**शरणागतिः**-(शरणागतेः षाड्विध्यं चाऽत्र)

**1. आनुकूल्यस्य संकल्पः -**

[23]**यदि गन्तुं कृता बुद्धिर्वनं मृगगजायुतम् ।**
**अहं त्वाऽनुगमिष्यामि वनमग्रे धनुर्धरः ॥**

**2. प्रातिकूल्यस्य वर्जनम् -**

[24]**न देवलोकाक्रमणं नामत्वमहं वृणे ।**

**ऐश्वर्यं वाऽपि लोकानां कामये न त्वया विना ॥**

**3. रक्षिष्यतीति विश्वास: -**

**[25]अनुज्ञातश्च भवता पूर्वमेव यदस्म्यहम् ।**
**किमिदानीं पुनरिदं क्रियते मे निवारणम् ॥**

**4. गोमृत्ववरणम् -**

**[26]कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ।**
**कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्पते ॥**

**5. आत्मनिक्षेपकार्पण्ये -**

**[27]भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।**
**अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥**

अनेकार्थस्यापि शरणशब्दस्य उपायार्थैकवाचकताऽत्र विहिता।

**[28]उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् ।**
**वर्तते सांप्रतं चैष उपायार्थैकवाचकः॥**

**नामान्तराण्यस्याः -**

प्रपत्तिः, न्यासः, भरन्यासः, निक्षेपः, आत्मनिक्षेपः, त्यागः इत्यादीनि नामान्तराणि शरणागतेः सन्ति।

**[29]निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः ।**
**संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपि ॥**

**[30]अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।**

**[31]त्वमेवोपायतायाच्ञा प्रपत्तिः शरणागतिः॥**
**त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ।**

**[32]निश्चितेऽनन्यसाध्यत्वे परतेष्टस्य साधने।**
**अयमत्र भरन्यासः प्रपत्तिरिति गीयते॥**

"कर्मादीतरोपायाः साध्योपायाः इति, भगवानेवोपायश्चेति सिद्धोपायस्सः" इति चोच्यते।

**[33]मुमुक्षुर्वै शरणमहं प्रपद्ये' '**

**[34]त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः**

**[35]तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः**

**[36]न्यास इत्याहुर्मनीषिणो ब्रह्माणम्**
**न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा।**
**तानि वा एतान्यवराणि तपांसि[37]।**

**[38]निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः।**
**सन्यासः त्याग इत्युक्तिः शरणागतिरित्यपि।।**

तैत्तिरीय-कठ-श्वेताश्वतरोपनिषदः इमां न्यासविद्यामुद्बोधयन्ति। लक्ष्मीतन्त्र-भरद्वाज-विष्वक्सेन-पाद्मादि-पाञ्चरात्रसंहिताः विशिष्य च अहिर्बुध्न्यसंहिता शरणागतिं विशदीकृत्य निरूपयति। षाड्विध्यं पञ्चाङ्गसंयुतत्वं चास्याः संहिताः प्रतिपादयन्ति। न्यासप्रधानकेना-**नुष्ठाने पञ्चाङ्गत्वव्यपदेशः, प्राधान्ये षडङ्गत्वमितिभावः[39]।**

इत्थं बहुषु बहुधा निरूपितेयं शरणागतिः। यदि शरणागतिः पूर्वोक्तैरङ्गैः षड्भिर्युता चेद् सा पूर्णशरणागतिरुच्यते।

**षाड्विध्यं**

1. आनुकूल्यस्य सङ्कल्पः।
2. प्रातिकूल्यस्य वर्जनम्।
3. रक्षिष्यतीति विश्वासः
4. गोमृत्ववरणम्।
5. आत्मनिक्षेपः।
6. कार्पण्यम्।

**आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता।**
**अन्तः स्थिताऽहं सर्वेषां भावानामिति निश्चयात्।।**
**मयीव सर्वभूतेषु ह्यानुकूल्यं समाचरेत्**
**तथैव प्रातिकूल्यं च भूतेषु परिवर्जयेत्।**
**त्यागो गर्वस्य कार्पण्यं श्रुतशीलादिजन्मनः।**
**अङ्गसामग्र्यसंपत्तेः अशक्तेरपि कर्मणाम्।**
**अधिकारस्य चासिद्धेः देशकालगुणक्षयात्।।**
**उपाया नैव सिद्ध्यन्ति ह्यपाया बहुलास्तथा।**
**इति या गर्वहानिस्तद्दैन्यं कार्पण्यमुच्यते।।**
**शक्तेः सूपसदत्वाच्च कृपायोगाच्च शाश्वतात्।**
**ईशेशितव्यसम्बन्धादनिन्दप्रथमादपि।**
**रक्षिष्यत्यनुकूलान्नः इति या सुदृढामतिः।।**
**स विश्वासो भवेद् शक्र सर्वदुष्कृतिनाशनः।**
**करुणादौ नापि व्यक्तं शक्तः स्वाम्यपि देहिनाम्।।**
**अप्रार्थितो न गोपयेत् इति तत् प्रार्थनामतिः**
**गोपायिता भवेत्येवं गोमृत्ववरणं स्मृतम्।।**
**तेन संरक्ष्यमाणस्य फले स्वाम्यवियुक्तता।**
**केशवार्पणपर्यन्ता ह्यात्मनिक्षेप उच्यते।।[40]**

**इति इन्द्राय लक्ष्म्या प्रतिबोधितः प्रपदनप्रकारः।।**

**अत्र शरणागतिर्नाम-** विश्वासपूर्वक-आकिञ्चन्यविषयक-प्रार्थनागर्भ-अध्यवसाय इति। अस्याः आचरणे न कोऽप्यस्ति विहितोऽधिकारः। सर्वोऽप्यधिकार्येव। परन्तु विश्वास अपेक्षितः। वस्तुतस्तु अधिकारिणः– अकिञ्चन्यम् अनन्यगतित्वमिति द्वौ धर्मावपेक्षितौ। अनेनोपा-यान्तराभाव एव विवक्षितः। अकिञ्चनशब्दो हि – नास्ति किञ्चन यस्येति व्युत्पत्या साधनान्तरराहित्यमेव साक्षाद् बोधयति।

**अस्पृष्टोपायान्तरः –** अस्पृष्टोपायान्तर एवात्र पूर्वाधिकारीति उपायान्तरेणापि मया साधयितुं शक्यत इति बुद्धिविरह एव हि तदस्पर्शः। अत एव हि अनागतानन्तकालसमीक्ष्यापि अदृष्टसन्ता-रोपायः इत्युक्तं गद्ये[41]।

**प्रपत्तिर्मुख्या –** नास्ति कोऽपि नियमव्रतः प्रपत्तेः। प्रपत्तेः देशनियमः, कालनियमः, प्रकारनियमः, अधिकारनियमः, फलनियमश्च नास्ति।

**न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः।**
**न देशकालौ नावस्थां योगोह्ययमपेक्षते इति।।**

भारद्वाजसंहितावचनमस्याभिप्रायस्योपष्टम्भकं भवति।

**"ब्रह्मक्षत्रविशःशूद्राः स्त्रियश्चान्तरजातयः। सर्व एव प्रपद्येरन् सर्वदातारमच्युतम्[42]।"**

शरणागतिः षडङ्गेति विश्वास एव मुख्य इति सकृदाचरणेनालमिति निष्कृष्टम्। शरणागतस्य आकिञ्चिन्यम् अनन्यगतित्वं च अपेक्षितम्। शरण्यस्य तु कारुण्यं सामर्थ्यं चापेक्षितमिति शरणागतिस्तु पुरुषाकारपुरस्सरं कार्येति च संप्रदायनिर्वाहः।

भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिरेव प्रपत्तिरिति प्रचितमभि-मतम्। अत्र गजेन्द्ररावणयोः स्वप्रवृत्तिं भगवद्प्रवृत्तिप्रतिबन्धकत्वेन उदाहरन्ति। तन्निवर्तनानन्तरमेव गजेन्द्रं भगवानरक्षदिति, चापविमोचनानन्तरमेव रावणं शरप्रहारैः नाशितवान् राम इति सुविशदं निरूपयन्ति।श्रीमद्रामायणे आसान्तं शरणागतिः प्रतिपादि-तेति श्रीसम्प्रदायपण्डितानामभिप्रायः।

**श्रीमद्रामयणे प्रदर्शिताः शरणागतयः**

| शरणागतः | शरण्यः | फलम् | काण्डः |
|---|---|---|---|
| 1. देवताः | विष्णुः | कैकङ्कर्यम् | बालकाण्डः |
| 2. त्रिशङ्कुः,शुनश्शेफः | विश्वामित्रः | शरीरस्वर्गमनम् प्राणपरिरक्षणं च | बालकाण्डः |
| 3. लक्ष्मणः | श्रीरामः | (अनुवर्तनम्)कैङ्कर्यम् | अयोध्याकाण्ड |
| 4. भरतः | श्रीरामः | कैङ्कर्यम् | अरण्यकाण्डः |
| 5. दण्डकमुनिमण्डली | श्रीरामः | कैङ्कर्यम् | अरण्यकाण्डः |
| 6. कोसलजनपदवासिनः | श्रीरामः | कैङ्कर्यम् | अरण्यकाण्डः |
| 7. काकासुरः | श्रीरामः | प्राणपरिरक्षणम् | सुन्दराकाण्डः |
| 8. हनुमान् | श्रीरामः | प्राणपरिरक्षणम् | सुन्दरकाण्डः |
| 9. सीता | श्रीरामः | प्राणपरिरक्षणम् | सुन्दरकाण्डः |
| 10.विभीषणः | श्रीरामः | कैङ्कर्यम् | युद्धकाण्डः |
| 11. श्रीरामः | समुद्रः | समुद्रतरणम् | युद्धकाण्डः |
| 12.त्रिजटादिराक्षसस्त्रियः | श्रीरामः | प्राणपरिरक्षणम् | युद्धकाण्डः |

**देवताशरणागतिः**

चतुर्मुखमुखास्सर्वे देवाः भगवन्तं शरणमुपागताः। त्वं गतिः परमादेव सर्वेषां नः परंतपः[43] इति। अनेन तेषामनन्यगतित्वम् आकिञ्चिन्यं निरूपितं भवति।

**विभीषणशरणागतिः**

विलक्षणा सर्वसमग्रा चेयं शरणागतिः। इयं तु चेतनस्य शरणागतिप्रकारस्य साकल्यनिरूपिका। यथा कोशलजनपदवासिभिः श्रीरामस्थितदेशवासाय शरणागतिरनुष्ठिता, तथा अत्र विभीषणेन-रावणेन तिरस्कृतेन-तस्य देश एव त्याज्य इति, लङ्कातो रामसन्निधिमागत्य शरणागतिरनुष्ठिता।

विभीषणः पितामहाल्लब्धवरवशाद्, स्वपुण्यपरिपाकशाच्च, श्रीरामं सर्ववेदान्तवेद्यं, सर्वलोकेश्वरं, मुक्तप्राप्यनारायणाख्यं परंब्रह्म-लोकानुजिघृक्षयावतीर्णमिति निर्विचिकित्समवगच्छति। साङ्गप्रपत्ति-रियम्- आनुकूल्यसङ्कल्पप्रातिकूल्यवर्जने विभीषणेन रावणाय कृतनीत्युपदेशेन सिद्ध्येते।

**रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।**
**तस्याहमनुजो भ्राता विभीषण इति श्रुतः[44]।।**

रावणस्यानुजो भ्राता- इत्यनेन आत्मनोऽपि दोषभाक्त्वं प्रकटयति। विभीषण इति श्रुतः – विविधं भीषयति इति नाममात्रेणापि भयङ्करत्वम्। रावणस्य निजदोष एव। आत्मनस्तु तस्य संसर्गवशादागतो दोष इति प्रतिकूलशेषत्वसमुपागतनिष्कर्षः।

**तेन सीता जनस्थानाद्धृता हत्वा जटायुषम्।**
**रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता[45]।**

रावणस्य दोषाः प्रायश्चित्तसाध्याः। वस्तुतः – न क्षमामीत्युक्त्या अपरिहारयोग्यो भागवतापचारोऽस्ति, अस्मिन् सीतापहरणरूपो, जटायुवधरूपश्च। तत्तादृशागसमपि भगवान् क्षमतीति- सरक्षतीति सूचयन् आत्मनोऽपराधिसंसर्गवशात् सोपाधिकबन्धुसंसर्गाच्च न क्षमतीति धिया-

**तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम्।**
**साधुनिर्यात्यतां सीता रामायेति पुनः पुनः।।**
**स च न प्रतिजग्राह रावणः कालचोदितः।**
**उच्यमानं हितं वाक्यं विपरीत इवौषधम्[46]।। इति वदति।**

अतोऽनेन सोपाधिकबन्धुत्यागः, निरुपाधिकशेषिशरणागतिः सूचिते भवतः।

**आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम्।**
**स्वस्ति तेऽस्तु गमिष्यामि सुखीभव मया विना[47]।। इति।।**

रावणायकृतहितोपदेशेन आनुकूल्यसंकल्पः सूचितो भवति। हितोपदेशासहिष्णुरावणसंसर्गपरिहारेण-

**भवन्तं सर्वभूतानां शरण्यं शरणं गतः।**
**परित्याक्ता मया लङ्का मित्राणि च धनानि वै[48]।**

इत्यनेन प्रातिकूल्यवर्जनमुक्तम्। सुग्रीवस्य भ्रातृकोपात् रक्षणवृत्तान्त-श्रणाद् विश्वास इति-

**सर्वलोकशरण्याय राघवाय महात्मने।**
**निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्[49]।।**

इति वचनात् गोप्तृत्ववरणमिति।

**भगवद्गतं मे राज्यं च जीवितं च सुखानि च।**
**तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत्[50]।।**

इत्यादिना आत्मनिक्षेपः।

**रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।**
**तस्याहमनुजो भ्राता विभीषिण इति श्रुतः[51]।।**

इति प्रबलप्रबलतरविरोधिकथनात् कार्पण्यम्।

**निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्।** इत्यनेन पुरुषाकारपुरस्सरा शरणागतिरिति सिद्धम्।

**मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन।**
**दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्[52]।।**

दोषी वा न वा शरणागतो रक्षितव्येति निश्चयः, न तु विभीषणः, यदि रावणः स्वयमागच्छति सोऽपि रक्षितव्य एव। रावणो वा अयं विभीषणवेशे आगतो भवतु, तथापि स रक्षणीय एव।

यद्यपि सुग्रीवादिभिरुक्ता दोषा नास्मिन् विभीषणे सन्ति। सन्तु वा ततोऽपि भूयांसः दुष्टोऽपि शरणागतशब्दप्रयोक्ता मया परिगृहीत इति, मम महद्यशो भवेद्। अदुष्टपरिग्रहे गुणो मन्दः। दुष्टपरिग्रहे तु मम शरणागतरक्षणधर्ममुत्तेजितो भवति।

करुणया दुष्टपरिग्रहः शिष्टानुमतं लभत एव। इति स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्य अतिशङ्कां निवार्य शरणागत-रक्षणरूपस्य स्वव्रतस्य धर्मशास्त्रसिद्धत्वात् तस्य अपरित्याज्यतां प्रतिपादयति। इयं हि तस्य प्रतिज्ञा-

**अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्।**

**न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः[53]।।**

अत्र श्रीरामेणोक्तोऽयं श्लोकः श्रीरामचरम इति प्रथितः लोके। श्लोकेनानेन रामस्याभयप्रदानव्रतं प्रथितं भवति। महाव्रतः, दृढव्रतः, इत्यादिभिरपि अयमेवाशय सूचितो भवति।

**सकृदेव प्रपन्नाय तवास्मीति च याचते।**

**अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम[54]।।**

प्रपदनप्रकारः सकृदेवेति निरूपितः। प्रपत्तिस्तु गत्यर्था बुद्ध्यर्था इति न्यायमनुसृत्य मनसी इत्युच्यते। तवास्मीत्यनेन वाचिकी वा भवेत्। उभयोरन्यतरेण युक्तयापीत्यर्थः। प्रपन्नाय – इति उपायः कथ्यते। याचना तच्छेषवृत्तिलक्षणफलविशेषप्रार्थना । एवंभूताय अधिकारिणे सर्वभूतेभ्यः, भयाभावं दास्यामि। अत्र अभयमेव मोक्षो नाम। अथ सोऽभयं गतो भवति आनन्दं ब्रह्मणोविद्वान् न बिभेति कुतश्चनेति इति ब्रह्मविद्याफलत्वेन श्रवणात्।

अत्र सर्वभूतेभ्यः इति चतुर्थी। प्रपन्नसम्बन्धिभ्योऽपि सर्वभूतेभ्यो अभयं ददामि।

**पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः।**

**ते नैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्[55]।।**

एवं श्रुतिः, स्मृतिः, सदाचारः, स्वस्य च प्रियात्मनः।

सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्[56]।। इति

विभीषणरक्षणरूपधर्मस्य पालनं कृतम्।।

**उपसंहारः**

"श्रीमद्रामायणे विभीषणशरणागतिः" इति शीर्षिकाङ्कितेऽस्मिन् शोधपत्रे नैके शरणागतिविषयाः प्रतिपादिताः। विशेषेण श्रीमद्रामायणे प्रदर्शिताः शरणागतयः इत्यंशमपि स्वीकृत्य बहवः विषयाः प्रतिपादिताः।

एवमेव वेदान्तदेशिकाचार्यैः स्वदशावतारस्तोत्रे अस्याः विभीषण-शराणागतेः वैभवं प्रतिपादितम्।

**पारावारपयो विशोषणाकलापारीणकालानल-**

**ज्वालाजालविहारहारिविशिखव्याघोरक्रमः।**

**सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती**

**धर्मो विग्रहवान् अधर्म विरतिं धन्वी स तन्वीत नः॥[57]**

सर्वथा प्रपन्नं जनं यः पालितवान् तादृशो रामः इति विभीषण-शरणागत्या स्तुवन्ति रामम्। एवं राराजते रामस्य एकशरण्यस्य महिमा इत्यनेन प्रकाश्यते। एवमेव यामुनाचार्याः स्वस्तोत्ररत्ने

**न धर्मनिष्ठोऽस्मि, न चात्मवेदी, न भक्तिमांस्त्वच्चरणारविन्दे ।**

**अकिञ्चनोऽनन्यगतिः शरण्य ! त्वत्पादमूलं शरणं प्रपद्ये ॥२२[58]**

यः शरणं याति सः कीदृशः भवेदिति अस्मिन् श्लोके प्रकटयन्ति। अत्र आत्मनिक्षेपः कार्पण्यं च सुप्रकाशते आचार्याणां वचनेषु।

**अन्यथा शरणं नास्ति त्वमेव शरणं मम।**

**तस्मात् कारुण्यभावेन रक्ष रक्ष जनार्दन॥**

तं त्यक्त्वा अन्यः शरण्यः नास्ति स एव गोप्ता, स एव रक्षति इति विश्वासश्च अत्र दृश्यते। एवमेव शरणागतिदीपिकायां वेदान्त-देशिकाचार्याः

**मुख्यं च यत्प्रपदनं स्वयमेव साध्यं**

**दातव्यमीश कृपया तदपि त्वयैव ।**

**तन्मे भवच्चरणसङ्गवतीमवस्थां**

**पश्यन्नुपायफलयोरुचितं विधेयाः॥[59]**

एवं सम्प्रदाये सर्वथा सर्वदा सर्वैरप्याचार्यवर्यैः शरणागतिः मूर्ध्नि विभूषिता। तां विना गतिरन्या नास्तीति बोधिता च। तदृश्याः शरणागतेः तदपि विशिष्टायाः विभीषणशरणागतेः रामायणरीत्या प्रतिपादनं कृतम्।

कालिदासः कुमारसम्भवे हिमवत्पर्वतवर्णनावसरे इत्थं कथयति- क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैश्शिरसां सतीव इति। अर्थात् ये च महात्मनः सन्ति, ते शरणं प्रपन्ने क्षुद्रेऽपि ममत्वभावनां दर्शयन्तीति। अत एव विभीषणः राक्षसकुले उत्पन्नेऽपि, शरणागतिं प्राप्तवान् इति एकेन हेतुना तस्य आश्रयं दत्तवान् श्रीरामः। महात्मनां स्वभावः एवं भवतीत्युक्त्वा विरमामि विस्तरात्।

**परिशीलितग्रन्थसूची**


1 श्रीमद्रामायणम् श्रीसम्प्रदायसमन्वयः तिरुमलतिरुपतिदेवस्थानम्

2.श्रीमद्रामायणम् चौखाम्बा वाराणसी

3. प्रतापरुद्रीयम् चौखाम्बा वाराणसी

4. चम्पूरामायणम् चौखाम्बा वाराणसी

5. तैत्तिरीयोपनिषद् नवरत्नबुक् हौस् (विजयवाटिका)

6. श्रीपाञ्चरात्रसंहिता तिरुमलतिरुपतिदेवस्थानम् (तिरुपतिः)

7. श्रीरङ्गगद्यम् दयासिन्धु असोसियेट्स् (चेन्नै)

8. ब्रह्मवैवर्तपुराणम् मोहन् पब्लिकेशन् (राजमहेन्द्रवरम्)

9. श्रीवचनभूषणव्याख्यानम् देवकोट्टै-राजाजी मुद्रणालये सम्मुद्र्य प्रकाशितम् (काञ्ची)

10. तात्पर्यदीपिका भारतीयकलाप्रकाशनम् (राष्ट्रियसंस्कृतविद्यापीठम्)

11. वेदान्तदेशिकस्तोत्रमाला डी.टी. स्वामिप्रकाशनम्

**पाद टिप्पणी**

1 चम्पूरामायणे बालकाण्डे-८ श्लोकः
2 रामायणे बालकाण्डे (१-२-३६)
3 प्रतापरुद्रीयम्- नायकप्रकरणम्
4 रामा.बा. 2-42
5 रामा.बा. 4-12
6 रामा.बा. 2-35,36
7 युद्ध.का 131-111
8 चम्पू-रा. बा-3
9 बाल 1-2
10 बाल 1-12
11 अयो 2-41
12 अरण्य 37-13
13 सुन्दर 36-12
14 सुन्दर 51-6
15 युद्ध 91-73
16 अयो. 21-29
17 अयो. 21-36
18 अयो.का 35-22
19 युद्ध.का 102-12
20 उत्तर.च 1-31
21 अयो.2-40
22 युद्ध-59-143
23 अयो.31-3
24 अयो.31-5
25 अयो.31-7
26 अयो.31-22
27 अयो.31-25
28 अहिर्बुध्न्यसंहिता 36-36
29 तात्पर्यदीपिका 341
30 विष्वक्सेनसंहिता
31 अहिर्बुध्न्यसंहिता 36-38
32 तात्पर्यदीपिका 375
33 श्वेताश्वतार 6-18
34 जितन्ते 1-4
35 तैत्तिरीयनारायमण् 6-50
36 Ibid
37 Ibid 6-78
38 श्रीपाश्चरात्रम्
39 तात्पर्यदीपिका
40 लक्ष्मीतन्त्रम् १७ अध्यायः
41 श्रीरङ्गगद्यम्
42 श्रीवचनभूषणव्याख्यानम्
43 बाल.15-24
44 (युद्ध.का 17-10)
45 युद्ध.का.17-11
46 युद्ध.का.17-12
47 युद्ध.का.16-24
48 युद्ध.का.19-5
49 युद्ध.का.17-15
50 युद्ध.का.19-5
51 युद्ध.17-10
52 युद्ध.18-3
53 अरण्य.का 10-9
54 युद्ध.18-33
55 ब्रह्म. वै प्रकृति.ख 55
56 धर्मप्रमानानुसारेण
57 दशावतारस्तोत्रम्
58 स्तोत्ररन्तम्
59 शरणागतिदीपिका ५५